ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठः

## (वाक्य सहित)

# सप्तमकाण्डे द्वितीयः प्रश्नः

**Notes:**

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0** **September 30, 2021**

## Version Notes:

**This is now the current Version 1.0 dated September 30, 2021.**

1. This replaces the earlier version 0.1 dated March 31, 2020.

2. We have listened to the Pada Parayanam telecast by TTD channel. The corrections found have been updated . The corrections found and reported till September 30, 2021 are also updated.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 30th September 2018 |
| 2nd | Version Number | 0.0 dated 31st January 2019 |
| 3rd | Version Number | 0.0 dated 30th November 2019 |
| 4th | Version Number | 0.1 dated 31st Mar 2020 |

**Contents**

7 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे सप्तमं काण्डं 4

7.2 सप्तमकाण्डे द्वितीयः प्रश्नः – षड्रात्राद्यानां निरूपणं 4

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, हरिः ओं

# 7 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे सप्तमं काण्डं

## 7.2 सप्तमकाण्डे द्वितीयः प्रश्नः – षड् रात्राद्यानां निरूपणं

### TS 7.2.1.1

साद्ध्या वै देवाः सुवर्गकामा एत॒ षड्रात्रमपश्यन् तमाऽहरन्
तेनायजन्त ततो वै ते सुवर्गं ँलोकमायन्. य एवं ँविद्वा॒ꣳसः
षड्रात्रमासते सुवर्गमेव लोकं ँयन्ति देवसत्रं ँवै षड्रात्रः
प्रत्यक्ष॒ ह्येतानि पृष्ठानि य एवं ँविद्वा॒ꣳसः षड्रात्रमासते
साक्षादेव देवता अभ्यारोहन्ति षड्रात्रो भवति षड् वा ऋतवः
षट् पृष्ठानि – [ ] 1

### TS 7.2.1.1 - Padam

साद्ध्याः । वै । देवाः । सुवर्गकामा इति सुवर्ग – कामाः । एतम् ।
षड्रात्रमिति षट् – रात्रम् । अपश्यन्न् । तम् । एति । अहरन्न् ।
तेन । अयजन्त । ततः । वै । ते । सुवर्गमिति सुवः–गम् । लोकम् ।

आयन्न् । ये । एवम् । विद्वाꣳसः । षड्रात्रमिति षट् – रात्रम् । आसते । सुवर्गमिति सुवः – गम् । एव । लोकम् । यन्ति । देवसत्रमिति देव – सत्रम् । वै । षड्रात्र इति षट् – रात्रः । प्रत्यक्षमिति प्रति – अक्षम् । हि । एतानि । पृष्ठानि । ये । एवम् । विद्वाꣳसः । षड्रात्रमिति षट् – रात्रम् । आसते । साक्षादिति स – अक्षात् । एव । देवताः । अभ्यारोहन्तीत्यभि – आरोहन्ति । षड्रात्र इति षट् – रात्रः । भवति । षट् । वै । ऋतवः । षट् । पृष्ठानि । **1 (50)**

**TS 7.2.1.2**

पृष्ठैरेवर्तून–न्वारोहन्त्यृतुभिः सँवथ्सरं ते सँवथ्सर एव प्रति तिष्ठन्ति बृहद्–रथन्तराभ्यां ँयन्तीयं ँवाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं ँलोकं ँयन्ति त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धते पञ्चदशो भवतीन्द्रियमेवाव रुन्धते सप्तदशो– [ ] **2**

**TS 7.2.1.2 - Padam**

पृष्ठैः । एव । ऋतून् । अन्वारोहन्तीत्यनु – आरोहन्ति ।

ऋतुभिरित्यृतु –भिः । सँवथ्सरमिति सं – वथ्सरम् । ते ।

सँवथ्सर इति सं – वथ्सरे । एव । प्रतीति । तिष्ठन्ति ।

बृहद्रथन्तराभ्यामिति बृहत् – रथन्तराभ्याम् । यन्ति । इयम् । वाव ।

रथन्तरमिति रथं – तरम् । असौ । बृहत् । आभ्याम् । एव । यन्ति ।

अथो इति । अनयोः । एव । प्रतीति । तिष्ठन्ति । एते इति । वै ।

यज्ञस्य । अञ्जसायनी इत्यञ्जसा – अयनी । स्रुती इति ।

ताभ्याम् । एव । सुवर्गमिति सुवः – गम् । लोकम् । यन्ति ।

त्रिवृदिति त्रि – वृत् । अग्निष्टोम इत्यग्नि – स्तोमः । भवति ।

तेजः । एव । अवेति । रुन्धते । पञ्चदश इति पञ्च – दशः ।

भवति । इन्द्रियम् । एव । अवेति । रुन्धते ।

सप्तदश इति सप्त – दशः । **2 (50)**

**TS 7.2.1.3**

भव–त्यन्नाद्यस्या–वरुद्ध्या अथो प्रैव तेन जायन्त एकवि॒ꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् दधते त्रिणवो भवति विजित्यै त्रयस्त्रि॒ꣳशो भवति प्रतिष्ठित्यै सदोहविर्द्धानिन एतेन षड्–रात्रेण यजेरन्नाश्वत्थी हविर्द्धानं चाऽऽग्नीद्ध्रं च भवतस्त**द्धि** सुवर्ग्यं चक्रीवती भवतः सुवर्गस्य लोकस्य समष्ट्या उलूखलबुद्ध्नो यूपो भवति प्रतिष्ठित्यै प्राञ्चो यान्ति प्राङिव हि सुवर्गो – [ ] **3**

**TS 7.2.1.3 Padam**

भवति । अन्नाद्यस्येत्यन्न – अद्यस्य । अवरुद्ध्या इत्यव – रुद्ध्यै । अथो इति । प्रेति । एव । तेन । जायन्ते । एकवि॒ꣳश इत्येक – वि॒ꣳशः । भवति । प्रतिष्ठित्या इति प्रति – स्थित्यै । अथो इति । रुचम् । एव । आत्मन्न् । दधते । त्रिणव इति त्रि – नवः । भवति । विजित्या इति वि – जित्यै । त्रयस्त्रि॒ꣳश इति त्रयः – त्रि॒ꣳशः । भवति । प्रतिष्ठित्या इति प्रति – स्थित्यै । सदोहविर्द्धानिन इति सदः – हविर्द्धानिनः । एतेन ।

षड्रात्रेणेति षट् – रात्रेण । यजेरन्न् । आश्वत्थी इति ।
हविर्द्धानमिति हविः – धानम् । च । आग्नीद्ध्रमित्याग्नि–इद्ध्रम् ।
च । भवतः । तत् । हि । सुवर्ग्यमिति सुवः – ग्यम् । चक्रीवती
इति । भवतः । सुवर्गस्येति सुवः – गस्य । लोकस्य । समष्ट्या
इति सं–अष्ट्यै । उलूखलबुद्ध्न इत्युलूखल – बुद्ध्नः । यूपः ।
भवति । प्रतिष्ठित्या इति प्रति – स्थित्यै । प्राञ्चः । यान्ति । प्राङ् ।
इव । हि । सुवर्ग इति सुवः – गः । **3 (50)**

**TS 7.2.1.4**

लोकः सरस्वत्या यान्त्येष वै देवयानः पन्था–स्त–मेवा–
न्वारोहन्त्याक्रोशन्तो यान्त्यवर्ति–मेवान्यस्मिन् प्रतिषज्य प्रतिष्ठां
गच्छन्ति यदा दश शतं कुर्वन्त्यथैक–मुत्थानꣳ शतायुः पुरुषः
शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्ति यदा शतꣳ सहस्रं
कुर्वन्त्यथैक–मुत्थानꣳ सहस्रसम्मितो वा असौ लोकोऽमुमेव
लोकमभि जयन्ति यदै ( ) –षां प्रमीयेत यदा वा जीयेरन्नथैक–
मुत्थानं त**द्धि** तीर्थं ॥ **4**

**TS 7.2.1.4 - Padam**

लोकः । सरस्वत्या । यान्ति । एषः । वै । देवयान इति देव-यानः ।
पन्थाः । तम् । एव । अन्वारोहन्तीत्यनु - आरोहन्ति ।
आक्रोशन्त इत्या - क्रोशन्तः । यान्ति । अवर्तिम् । एव ।
अन्यस्मिन्न् । प्रतिषज्येति प्रति - सज्य । प्रतिष्ठामिति प्रति-स्थाम् ।
गच्छन्ति । यदा । दश । शतम् । कुर्वन्ति । अथ । एकम् ।
उत्थानमित्युत्-स्थानम् । शतायुरिति शत - आयुः । पुरुषः ।
शतेन्द्रिय इति शत-इन्द्रियः । आयुषि । एव । इन्द्रिये । प्रतीति ।
तिष्ठन्ति । यदा । शतम् । सहस्रम् । कुर्वन्ति । अथ । एकम् ।
उत्थानमित्युत्- स्थानम् । सहस्रसम्मित इति सहस्र-सम्मितः ।
वै । असौ । लोकः । अमुम् । एव । लोकम् । अभीति । जयन्ति ।
यदा ( ) । एषाम् । प्रमीयेतेति प्र - मीयेत । यदा । वा । जीयेरन्न् ।
अथ । एकम् । उत्थानमित्युत्-स्थानम् । तत् । हि । तीर्थम् ॥ **4 (61)**

*(पृष्ठानि-सप्तदशः-सुवर्गो-जयन्ति यदै - कादश च) (A1)*

**TS 7.2.2.1**

कुसुरुबिन्द औद्दालकि-रकामयत पशुमान्थ् स्यामिति स एतꣳ

सप्तरात्रमाऽहरत् तेनायजत तेन वै स यावन्तो ग्राम्याः

पशवस्तानवा-रुन्ध य एवं ँविद्वान्थ् सप्तरात्रेण यजते यावन्त

एव ग्राम्याः पशवस्तानेवाव रुन्धे सप्तरात्रो भवति सप्त ग्राम्याः

पशवः सप्ताऽऽरण्याः सप्त छन्दाꣳस्युभयस्या-वरुद्ध्यै

त्रिवृदग्निष्टोमो भवति तेज - [ ] **5**

**TS 7.2.2.1 - Padam**

कुसुरुबिन्दः । औद्दालकिरित्यौत् - दालकिः । अकामयत ।

पशुमानिति पशु - मान् । स्याम् । इति । सः । एतम् ।

सप्तरात्रमिति सप्त-रात्रम् । एति । अहरत् । तेन । अयजत । तेन ।

वै । सः । यावन्तः । ग्राम्याः । पशवः । तान् । अवेति । अरुन्ध ।

यः । एवम् । विद्वान् । सप्तरात्रेणेति सप्त - रात्रेण । यजते ।

यावन्तः । एव । ग्राम्याः । पशवः । तान् । एव । अवेति । रुन्धे ।

सप्तरात्र इति सप्त-रात्रः । भवति । सप्त । ग्राम्याः । पशवः ।

सप्त । आरण्याः । सप्त । छन्दाꣳसि । उभयस्य । अवरुद्ध्या

इत्यव–रुद्ध्यै । त्रिवृदिति त्रि – वृत् । अग्निष्टोम इत्यग्नि–स्तोमः ।

भवति । तेजः । **5 (50)**

**TS 7.2.2.2**

एवाव रुन्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्धे सप्तदशो

भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायत एकविꣳशो भवति

प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् धत्ते त्रिणवो भवति विजित्यै

पञ्चविꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवा–नन्नाद्यस्या–

वरुद्ध्यै विश्वजिथ् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै यत्

प्रत्यक्षं पूर्वेष्वहस्सु पृष्ठान्युपेयुः प्रत्यक्षं –[ ] **6**

**TS 7.2.2.2 - Padam**

एव । अवेति । रुन्धे । पञ्चदश इति पञ्च – दशः । भवति ।

इन्द्रियम् । एव । अवेति । रुन्धे । सप्तदश इति सप्त – दशः ।

भवति । अन्नाद्यस्येत्यन्न – अद्यस्य । अवरुद्ध्या इत्यव–रुद्ध्यै ।

अथो इति । प्रेति । एव । तेन । जायते । एकविꣳश

इत्येक – विꣳशः । भवति । प्रतिष्ठित्या इति प्रति – स्थित्यै ।

अथो इति । रुचम् । एव । आत्मन्न् । धत्ते । त्रिणव इति त्रि–नवः ।

भवति । विजित्या इति वि – जित्यै । पञ्चविꣳश इति

पञ्च – विꣳशः । अग्निष्टोम इत्यग्नि – स्तोमः । भवति ।

प्रजापतेरिति प्रजा–पतेः । आप्त्यै । महाव्रतवानिति महाव्रत–वान् ।

अन्नाद्यस्येत्यन्न–अद्यस्य । अवरुद्ध्या इत्यव – रुद्ध्यै ।

विश्वजिदिति विश्व – जित् । सर्वपृष्ठ इति सर्व – पृष्ठः ।

अतिरात्र इत्यति – रात्रः । भवति । सर्वस्य ।

अभिजित्या इत्यभि – जित्यै । यत् । प्रत्यक्षमिति प्रति – अक्षम् ।

पूर्वेषु । अहस्स्वित्यहः – सु । पृष्ठानि । उपेयुरित्युप – इयुः ।

प्रत्यक्षमिति प्रति – अक्षम् । **6 (50)**

**<u>TS 7.2.2.3</u>**

ँविश्वजिति यथा दुग्धा–मुपसीदत्येवमुत्तम–महः स्यान्नैकरात्रश्चन

स्याद् बृहद्रथन्तरे पूर्वेष्वहस्सूप यन्तीयं ँवाव रथन्तरमसौ

बृहदाभ्यामेव न यन्त्यथो अनयोरेव प्रति तिष्ठन्ति यत् प्रत्यक्षं
ँविश्वजिति पृष्ठान्युपयन्ति यथा प्रत्तां दुहे तादृगेव तत् ॥ 7

**TS 7.2.2.3 - Padam**

विश्वजितीति विश्व – जिति । यथा । दुग्धाम् ।
उपसीदतीत्युप– सीदति । एवम् । उत्तममित्युत् – तमम् । अहः ।
स्यात् । न । एकरात्र इत्येक – रात्रः । चन । स्यात् ।
बृहद्रथन्तरे इति बृहत्–रथन्तरे । पूर्वेषु । अहस्स्वित्यहः – सु ।
उपेति । यन्ति । इयम् । वाव । रथन्तरमिति रथं – तरम् । असौ ।
बृहत् । आभ्याम् । एव । न । यन्ति । अथो इति । अनयोः । एव ।
प्रतीति । तिष्ठन्ति । यत् । प्रत्यक्षमिति प्रति – अक्षम् । विश्वजितीति
विश्व – जिति । पृष्ठानि । उपयन्तीत्युप – यन्ति । यथा । प्रत्ताम् ।
दुहे । तादृक् । एव । तत् ॥ 7 (42)

*(तेज – उपेयुः प्रत्यक्षं – द्विचत्वारिꣳशच्च) (A2)*

**TS 7.2.3.1**

बृहस्पति–रकामयत ब्रह्मवर्चसी स्यामिति स एत–मष्टरात्र–मपश्यत्

तमाऽहरत् तेनायजत ततो वै स ब्रह्मवर्चस्यभवद्–य एवं

ँविद्वानष्टरात्रेण यजते ब्रह्मवर्चस्येव भवत्यष्टरात्रो भवत्यष्टाक्षरा गायत्री

गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धे ऽष्टरात्रो भवति

चतस्रो वै दिशश्चतस्रो ऽवान्तरदिशा दिग्भ्य एव

ब्रह्मवर्चसमव रुन्धे – [ ] **8**

**TS 7.2.3.1 - Padam**

बृहस्पतिः । अकामयत । ब्रह्मवर्चसीति ब्रह्म – वर्चसी । स्याम् ।

इति । सः । एतम् । अष्टरात्रमित्यष्ट–रात्रम् । अपश्यत् । तम् । एति ।

अहरत् । तेन । अयजत । ततः । वै । सः ।

ब्रह्मवर्चसीति ब्रह्म–वर्चसी । अभवत् । यः । एवम् । विद्वान् ।

अष्टरात्रेणेत्यष्ट – रात्रेण । यजते । ब्रह्मवर्चसीति ब्रह्म – वर्चसी ।

एव । भवति । अष्टरात्र इत्यष्ट – रात्रः । भवति ।

अष्टाक्षरेत्यष्टा – अक्षरा । गायत्री । गायत्री ।

ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । गायत्रिया । एव ।

ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । अवेति । रुन्धे ।

अष्टरात्र इत्यष्ट–रात्रः । भवति । चतस्रः । वै । दिशः । चतस्रः ।

अवान्तरदिशा इत्यवान्तर–दिशाः । दिग्भ्य इति दिक् – भ्यः । एव ।

ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । अवेति । रुन्धे । **8 (50)**

**TS 7.2.3.2**

त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्धे सप्तदशो भवत्यन्नाद्यस्या–वरुद्ध्या अथो प्रैव तेन जायत एकवि॒ꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् धत्ते त्रिणवो भवति विजित्यै त्रयस्त्रि॒ꣳशो भवति प्रतिष्ठित्यै पञ्चवि॒ꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्यावरुद्ध्यै विश्वजिथ् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै ( ) ॥ **9**

**TS 7.2.3.2 - Padam**

त्रिवृदिति त्रि – वृत् । अग्निष्टोम इत्यग्नि–स्तोमः । भवति । तेजः ।

एव । अवेति । रुन्धे । पञ्चदश इति पञ्च – दशः । भवति ।

इन्द्रियम् । एव । अवेति । रुन्धे । सप्तदश इति सप्त – दशः ।

भवति । अन्नाद्यस्येत्यन्न – अद्यस्य । अवरुद्ध्या इत्यव – रुद्ध्यै ।

अथो इति । प्रेति । एव । तेन । जायते । एकवि॒ꣳश

इत्येक – वि॒ꣳशः । भवति । प्रतिष्ठित्या इति प्रति – स्थित्यै ।

अथो इति । रुचम् । एव । आत्मन्न् । धत्ते । त्रिणव इति त्रि–नवः ।

भवति । विजित्या इति वि – जित्यै ।

त्रयस्त्रि॒ꣳश इति त्रयः – त्रि॒ꣳशः ।

भवति । प्रतिष्ठित्या इति प्रति – स्थित्यै । पञ्चवि॒ꣳश इति

पञ्च – वि॒ꣳशः । अग्निष्टोम इत्यग्नि – स्तोमः । भवति ।

प्रजापतेरिति प्रजा–पतेः । आप्त्यै । महाव्रतवानिति महाव्रत–वान् ।

अन्नाद्यस्येत्यन्न – अद्यस्य । अवरुद्ध्या इत्यव – रुद्ध्यै ।

विश्वजिदिति विश्व – जित् । सर्वपृष्ठ इति सर्व – पृष्ठः ।

अतिरात्र इत्यति – रात्रः । भवति । सर्वस्य ।

अभिजित्या इत्यभि – जित्यै ( ) ॥ **9 (50)**

*(दिग्भ्य एव ब्रह्मवर्चसमव रुन्धे - ऽभिजित्यै) (A3)*

**TS 7.2.4.1**

प्रजापतिः प्रजा असृजत ताः सृष्टाः क्षुधं न्यायन्थ्स एतं नवरात्रमपश्यत्
तमा ऽहरत् तेनायजत ततो वै प्रजाभ्यो ऽकल्पत यर्.हि प्रजाः क्षुधं
निगच्छेयुस्तर्.हि नवरात्रेण यजेतेमे हि वा एतासां ँलोका अक्लृप्ता
अथैताः क्षुधं नि गच्छन्तीमानेवाऽऽभ्यो लोकान् कल्पयति तान्
कल्पमानान् प्रजाभ्यो ऽनु कल्पते कल्पन्ते - [ ] **10**

**TS 7.2.4.1 - Padam**

प्रजापतिरिति प्रजा - पतिः । प्रजा इति प्र-जाः । असृजत । ताः ।
सृष्टाः । क्षुधम् । नीति । आयन्न् । सः । एतम् । नवरात्रमिति
नव - रात्रम् । अपश्यत् । तम् । एति । अहरत् । तेन । अयजत ।
ततः । वै । प्रजाभ्य इति प्र - जाभ्यः । अकल्पत । यर्.हि । प्रजा
इति प्र - जाः । क्षुधम् । निगच्छेयुरिति नि - गच्छेयुः । तर्.हि ।
नवरात्रेणेति नव - रात्रेण । यजेत । इमे । हि । वै । एतासाम् ।
लोकाः । अक्लृप्ताः । अथ । एताः । क्षुधम् । नीति । गच्छन्ति ।

इमान् । एव । आभ्यः । लोकान् । कल्पयति । तान् । कल्पमानान् । प्रजाभ्य इति प्र – जाभ्यः । अन्विति । कल्पते । कल्पन्ते । **10 (50)**

**TS 7.2.4.2**

ऽस्मा इमे लोका ऊर्जं प्रजासु दधाति त्रिरात्रेणैवेमं ँल्लोकं कल्पयति त्रिरात्रेणान्तरिक्षं त्रिरात्रेणामुं ँल्लोकं ँयथा गुणे गुणमन्वस्यत्येवमेव तल्लोके लोकमन्वस्यति धृत्या अशिथिलंभावाय ज्योतिर्गौरायुरिति ज्ञाताः स्तोमा भवन्तीयं ँवाव ज्योतिरन्तरिक्षं गौ–रसावायुरेष्वेव लोकेषु प्रति तिष्ठन्ति ज्ञात्रं प्रजानां–[ ] **11**

**TS 7.2.4.2 - Padam**

अस्मै । इमे । लोकाः । ऊर्जम् । प्रजास्विति प्र – जासु । दधाति । त्रिरात्रेणेति त्रि – रात्रेण । एव । इमम् । लोकम् । कल्पयति । त्रिरात्रेणेति त्रि – रात्रेण । अन्तरिक्षम् । त्रिरात्रेणेति त्रि – रात्रेण । अमुम् । लोकम् । यथा । गुणे । गुणम् । अन्वस्यतीत्यनु–अस्यति । एवम् । एव । तत् । लोके । लोकम् । अन्विति । अस्यति । धृत्यै । अशिथिलंभावायेत्यशिथिलं – भावाय । ज्योतिः । गौः । आयुः ।

इति । ज्ञाताः । स्तोमाः । भवन्ति । इयम् । वाव । ज्योतिः ।
अन्तरिक्षम् । गौः । असौ । आयुः । एषु । एव । लोकेषु । प्रतीति ।
तिष्ठन्ति । ज्ञात्रम् । प्रजानामिति प्र – जानाम् । **11 (50)**

**TS 7.2.4.3**

गच्छति नवरात्रो भवत्यभिपूर्वमेवाऽस्मिन् तेजो दधाति यो ज्योगामयावी
स्याथ् स नवरात्रेण यजेत प्राणा हि वा एतस्याधृता अथैतस्य
ज्योगामयति प्राणानेवास्मिन् दाधारोत यदीतासुर्भवति जीवत्येव ॥ **12**

**TS 7.2.4.3 - Padam**

गच्छति । नवरात्र इति नव – रात्रः । भवति ।
अभिपूर्वमित्यभि–पूर्वम् । एव । अस्मिन्न् । तेजः । दधाति । यः ।
ज्योगामयावीति ज्योक् – आमयावी । स्यात् । सः ।
नवरात्रेणेति नव – रात्रेण । यजेत । प्राणा इति प्र–अनाः । हि । वै ।
एतस्य । अधृताः । अथ । एतस्य । ज्योक् । आमयति ।
प्राणानिति प्र – अनान् । एव । अस्मिन्न् । दाधार । उत । यदि ।

इतासुरितीत – असुः । भवति । जीवति । एव ॥ **12 (33)**

*(कल्पन्ते–प्रजनां – त्रयस्त्रिꣳशच्च) (A4)*

**TS 7.2.5.1**

प्रजापतिरकामयत प्र जायेयेति स एतं दशहोतारमपश्यत् तमजुहोत् तेन दशरात्रमसृजत तेन दशरात्रेण प्राजायत दशरात्राय दीक्षिष्यमाणो दशहोतारं जुहुयाद्–दशहोत्रैव दशरात्रꣳ सृजते तेन दशरात्रेण प्र जायते वैराजो वा एष यज्ञो यद्दशरात्रो य एवं ँविद्वान् दशरात्रेण यजते विराजमेव गच्छति प्राजापत्यो वा एष यज्ञो यद्–दशरात्रो–[ ] **13**

**TS 7.2.5.1 - Padam**

प्रजापतिरिति प्रजा – पतिः । अकामयत । प्रेति । जायेय । इति । सः । एतम् । दशहोतारमिति दश – होतारम् । अपश्यत् । तम् । अजुहोत् । तेन । दशरात्रमिति दश – रात्रम् । असृजत । तेन । दशरात्रेणेति दश – रात्रेण । प्रेति । अजायत । दशरात्रायेति दश – रात्राय । दीक्षिष्यमाणः । दशहोतारमिति दश – होतारम् । जुहुयात् । दशहोत्रेति दश–होत्रा । एव । दशरात्रमिति दश–रात्रम् ।

सृजते । तेन । दशरात्रेणेति दश–रात्रेण । प्रेति । जायते । वैराजः ।
वै । एषः । यज्ञः । यत् । दशरात्र इति दश – रात्रः । यः । एवम् ।
विद्वान् । दशरात्रेणेति दश – रात्रेण । यजते । विराजमिति
वि – राजम् । एव । गच्छति । प्राजापत्य इति प्राजा – पत्यः । वै ।
एषः । यज्ञः । यत् । दशरात्र इति दश – रात्रः । **13 (50)**

**TS 7.2.5.2**

य एवं ँविद्वान् दशरात्रेण यजते प्रैव जायत इन्द्रो वै सदृङ्
देवताभिरासीथ् स न व्यावृतमगच्छथ् स प्रजापतिमुपाधावत् तस्मा
एतं दशरात्रं प्रायच्छत् तमाऽहरत् तेनायजत ततो वै सो ऽन्याभि–
र्देवताभि–र्व्यावृतमगच्छद्–य एवं ँविद्वान् दशरात्रेण यजते
व्यावृतमेव पाप्मना भ्रातृव्येण गच्छति त्रिककुद् वा – [ ] **14**

**TS 7.2.5.2 - Padam**

यः । एवम् । विद्वान् । दशरात्रेणेति दश – रात्रेण । यजते । प्रेति ।
एव । जायते । इन्द्रः । वै । सदृङ्ङिति स – दृङ् । देवताभिः ।
आसीत् । सः । न । व्यावृतमिति वि – आवृतम् । अगच्छत् । सः ।

प्रजापतिमिति प्रजा – पतिम् । उपेति । अधावत् । तस्मै । एतम् ।
दशरात्रमिति दश–रात्रम् । प्रेति । अयच्छत् । तम् । एति । अहरत् ।
तेन । अयजत । ततः । वै । सः । अन्याभिः । देवताभिः ।
व्यावृतमिति वि – आवृतम् । अगच्छत् । यः । एवम् । विद्वान् ।
दशरात्रेणेति दश – रात्रेण । यजते । व्यावृतमिति वि – आवृतम् ।
एव । पाप्मना । भ्रातृव्येण । गच्छति । त्रिककुदिति त्रि – ककुत् ।
वै । **14 (50)**

**<u>TS 7.2.5.3</u>**

एष यज्ञो यद्–दशरात्रः ककुत् पञ्चदशः ककुदेकवि॒ꣳशः ककुत्
त्रयस्त्रि॒ꣳशो य एवं ँविद्वान् दशरात्रेण यजते त्रिककुदेव समानानां
भवति यजमानः पञ्चदशो यजमान एकवि॒ꣳशो यजमानस्त्रयस्त्रि॒ꣳशः
पुर इतरा अभिचर्यमाणो दशरात्रेण यजेत देवपुरा एव पर्यूहते तस्य
न कुतश्चनोपाव्याधो भवति नैनमभिचरन्थ् स्तृणुते देवासुराः सँयत्ता
आसन् ते देवा एता – [ ] **15**

**TS 7.2.5.3 - Padam**

एषः । यज्ञः । यत् । दशरात्र इति दश – रात्रः । ककुत् । पञ्चदश
इति पञ्च – दशः । ककुत् । एकविꣳश इत्येक – विꣳशः ।
ककुत् । त्रयस्त्रिꣳश इति त्रयः – त्रिꣳशः । यः । एवम् । विद्वान् ।
दशरात्रेणेति दश – रात्रेण । यजते । त्रिककुदिति त्रि – ककुत् ।
एव । समानानाम् । भवति । यजमानः । पञ्चदश इति पञ्च–दशः ।
यजमानः । एकविꣳश इत्येक – विꣳशः । यजमानः ।
त्रयस्त्रिꣳश इति त्रयः – त्रिꣳशः । पुरः । इतराः । अभिचर्यमाण
इत्यभि – चर्यमाणः । दशरात्रेणेति दश – रात्रेण । यजेत ।
देवपुरा इति देव–पुराः । एव । परीति । ऊहते । तस्य । न । कुतः ।
चन । उपाव्याध इत्युप – आव्याधः । भवति । न । एनम् ।
अभिचरन्नित्यभि – चरन्न् । स्तृणुते । देवासुरा इति देव–असुराः ।
सँयत्ता इति सं – यत्ताः । आसन्न् । ते । देवाः । एताः । **15 (50)**

**TS 7.2.5.4**

देवपुरा अपश्यन्. यद्–दशरात्रस्ताः पर्यौहन्त तेषां न कुतश्चनोपाव्याधो

ऽभवत् ततो देवा अभवन् पराऽसुरा यो भ्रातृव्यवान्थ् स्याथ् स

दशरात्रेण यजेत देवपुरा एव पर्यूहते तस्य न कुतश्चनोपाव्याधो

भवति भवत्यात्मना पराऽस्य भ्रातृव्यो भवति स्तोमः

स्तोमस्योपस्तिर्भवति भ्रातृव्यमेवोपस्तिं कुरुते जामि वा – [ ] **16**

**TS 7.2.5.4 - Padam**

देवपुरा इति देव–पुराः । अपश्यन्न् । यत् । दशरात्र इति दश–रात्रः ।

ताः । परीति । औहन्त । तेषाम् । न । कुतः । चन । उपाव्याध

इत्युप – आव्याधः । अभवत् । ततः । देवाः । अभवन्न् । परेति ।

असुराः । यः । भ्रातृव्यवानिति भ्रातृव्य – वान् । स्यात् । सः ।

दशरात्रेणेति दश – रात्रेण । यजेत । देवपुरा इति देव – पुराः ।

एव । परीति । ऊहते । तस्य । न । कुतः । चन । उपाव्याध

इत्युप– आव्याधः । भवति । भवति । आत्मना । परेति । अस्य ।

भ्रातृव्यः । भवति । स्तोमः । स्तोमस्य । उपस्तिः । भवति ।
भ्रातृव्यम् । एव । उपस्तिम् । कुरुते । जामि । वै । **16 (50)**

**TS 7.2.5.5**

एतत् कुर्वन्ति यज्ज्यायाꣳसꣳ स्तोममुपेत्य कनीयाꣳसमुपयन्ति
यदग्निष्टोमसामान्यवस्ताच्च परस्ताच्च भवन्त्यजामित्वाय
त्रिवृदग्निष्टोमो ऽग्निष्टुदाग्नेयीषु भवति तेज एवाव रुन्धे पञ्चदश
उक्थ्य ऐन्द्रीष्विन्द्रियमेवाव रुन्धे त्रिवृदग्निष्टोमो वैश्वदेवीषु पुष्टिमेवाव
रुन्धे सप्तदशोऽग्निष्टोमः प्राजापत्यासु तीव्रसोमो ऽन्नाद्यस्या–वरुद्ध्या
अथो प्रैव तेन जायत – [ ] **17**

**TS 7.2.5.5 - Padam**

एतत् । कुर्वन्ति । यत् । ज्यायाꣳसम् । स्तोमम् । उपेत्येत्युप–इत्य ।
कनीयाꣳसम् । उपयन्तीत्युप – यन्ति । यत् ।
अग्निष्टोमसामानीत्यग्निष्टोम–सामानि । अवस्तात् । च । परस्तात् ।
च । भवन्ति । अजामित्वायेत्यजामि – त्वाय । त्रिवृदिति त्रि – वृत् ।
अग्निष्टोम इत्यग्नि – स्तोमः । अग्निष्टुदित्यग्नि–स्तुत् । आग्नेयीषु ।

भवति । तेजः । एव । अवेति । रुन्धे । पञ्चदश इति पञ्च–दशः ।
उक्थ्यः । ऐन्द्रीषु । इन्द्रियम् । एव । अवेति । रुन्धे ।
त्रिवृदिति त्रि – वृत् । अग्निष्टोम इत्यग्नि – स्तोमः ।
वैश्वदेवीष्विति वैश्व – देवीषु । पुष्टिम् । एव । अवेति । रुन्धे ।
सप्तदश इति सप्त – दशः । अग्निष्टोम इत्यग्नि – स्तोमः ।
प्राजापत्यास्विति प्राजा – पत्यासु । तीव्रसोम इति तीव्र–सोमः ।
अन्नाद्यस्येत्यन्न – अद्यस्य । अवरुद्ध्या इत्यव–रुद्ध्यै ।
अथो इति । प्रेति । एव । तेन । जायते । **17 (50)**

**TS 7.2.5.6**

एकवि॑ꣳश उक्थ्यः सौरीषु प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् धत्ते
सप्तदशो ऽग्निष्टोमः प्राजापत्यासूपहव्य उपहवमेव गच्छति
त्रिणवावग्निष्टोमावभित ऐन्द्रीषु विजित्यै त्रयस्त्रि॑ꣳश उक्थ्यो
वैश्वदेवीषु प्रतिष्ठित्यै विश्वजिथ् सर्वपृष्ठो ऽतिरात्रो भवति
सर्वस्याभिजित्यै ॥ **18**

**TS 7.2.5.6 - Padam**

एकवि॒ꣳश इत्येक – वि॒ꣳशः । उ॒क्थ्यः । सौरी॒षु । प्रतिष्ठित्या॒ इति॒ प्रति – स्थि॒त्यै॒ । अथो॒ इति । रुचम् । ए॒व । आ॒त्मन्न् । ध॒त्ते॒ । सप्तदश इति सप्त – द॒शः । अ॒ग्नि॒ष्टो॒म इत्यग्नि – स्तो॒मः । प्राजापत्यास्विति प्राजा – प॒त्यासु । उ॒प॒ह॒व्य इत्युप – ह॒व्यः । उपहवमित्युप – ह॒वम् । ए॒व । ग॒च्छ॒ति॒ । त्रि॒ण॒वाविति त्रि – न॒वौ । अ॒ग्नि॒ष्टो॒मावित्यग्नि – स्तो॒मौ । अ॒भितः । ऐ॒न्द्रीषु । विजित्या॒ इति॒ वि – जि॒त्यै॒ । त्र॒य॒स्त्रि॒ꣳश इति त्रयः – त्रि॒ꣳशः । उ॒क्थ्यः । वै॒श्व॒दे॒वीष्विति वैश्व – दे॒वीषु । प्रतिष्ठित्या॒ इति॒ प्रति – स्थि॒त्यै॒ । वि॒श्व॒जिदिति विश्व – जित् । सर्वपृ॒ष्ठ इति॒ सर्व – पृ॒ष्ठः । अ॒ति॒रा॒त्र इत्यति – रा॒त्रः । भ॒व॒ति॒ । सर्वस्य । अ॒भिजित्या॒ इत्य॒भि – जि॒त्यै॒ ॥ **18 (31)** *(प्र॒जा॒पत्यो॒ वा ए॒ष य॒ज्ञो यद् दशरा॒त्र – स्त्रि॒ककुद्धा – ए॒ता – वै – जाय॒त – एकत्रिꣳशच्च) (A5)*

**TS 7.2.6.1**

ऋतवो वै प्रजाकामाः प्रजां नाविन्दन्त ते ऽकामयन्त प्रजाꣳ सृजेमहि

प्रजामव रुन्धीमहि प्रजां ँविन्देमहि प्रजावन्तः स्यामेति त

एतमेकादशरात्रमपश्यन् तमा ऽहरन् तेनायजन्त ततो वै ते प्रजामसृजन्त

प्रजामवारुन्धत प्रजामविन्दन् त प्रजावन्तो ऽभवन्त ऋतवो ऽभवन्

तदार्तवाना–मार्तवत्व–मृतूनां ँवा एते पुत्रास्तस्मा – [ ] **19**

**TS 7.2.6.1 - Padam**

ऋतवः । वै । प्रजाकामा इति प्रजा – कामाः । प्रजामिति

प्र – जाम् । न । अविन्दन्त । ते । अकामयन्त । प्रजामिति

प्र – जाम् । सृजेमहि । प्रजामिति प्र–जाम् । अवेति । रुन्धीमहि ।

प्रजामिति प्र – जाम् । विन्देमहि । प्रजावन्त इति प्रजा – वन्तः ।

स्याम । इति । ते । एतम् । एकादशरात्रमित्येकादश – रात्रम् ।

अपश्यन्न् । तम् । एति । अहरन्न् । तेन । अयजन्त । ततः । वै । ते ।

प्रजामिति प्र – जाम् । असृजन्त । प्रजामिति प्र – जाम् । अवेति ।

अरुन्धत । प्रजामिति प्र - जाम् । अविन्दन्त । प्रजावन्त इति प्रजा - वन्तः । अभवन्न् । ते । ऋतवः । अभवन्न् । तत् । आर्तवानाम् । आर्तवत्वमित्यार्तव - त्वम् । ऋतूनाम् । वै । एते । पुत्राः । तस्मात् । **19 (50)**

**TS 7.2.6.2**

-दार्तवा उच्यन्ते य एवं ँविद्वा॒ꣳस एकादशरात्रमासते प्रजामेव सृजन्ते प्रजामव रुन्धते प्रजां ँविन्दन्ते प्रजावन्तो भवन्ति ज्योतिरतिरात्रो भवति ज्योतिरेव पुरस्ताद्-दधते सुवर्गस्य लोकस्या-नुख्यात्यै पृष्ठ्यः षडहो भवति षड् वा ऋतवः षट् पृष्ठानि पृष्ठैरेवर्तून-न्वारोहन्त्यृतुभिः सँवथ्सरं ते सँवथ्सर एव प्रति तिष्ठन्ति चतुर्वि॒ꣳशो भवति चतुर्वि॒ꣳशत्यक्षरा गायत्री - [ ] **20**

**TS 7.2.6.2 - Padam**

आर्तवाः । उच्यन्ते । ये । एवम् । विद्वा॒ꣳसः । एकादशरात्रमित्येकादश - रात्रम् । आसते । प्रजामिति प्र - जाम् ।

एव । सृजन्ते । प्रजामिति प्र - जाम् । अवेति । रुन्धते । प्रजामिति प्र - जाम् । विन्दन्ते । प्रजावन्त इति प्रजा - वन्तः । भवन्ति । ज्योतिः । अतिरात्र इत्यति - रात्रः । भवति । ज्योतिः । एव । पुरस्तात् । दधते । सुवर्गस्येति सुवः - गस्य । लोकस्य । अनुख्यात्या इत्यनु - ख्यात्यै । पृष्ठ्यः । षडह इति षट् - अहः । भवति । षट् । वै । ऋतवः । षट् । पृष्ठानि । पृष्ठैः । एव । ऋतून् । अन्वारोहन्तीत्यनु - आरोहन्ति । ऋतुभिरित्यृतु - भिः । सँवथ्सरमिति सं - वथ्सरम् । ते । सँवथ्सर इति सं - वथ्सरे । एव । प्रतीति । तिष्ठन्ति । चतुर्वि॒ꣳश इति चतुः-वि॒ꣳशः । भवति । चतुर्वि॒ꣳशत्यक्षरेति चतुवि॒ꣳशति - अक्षरा । गायत्री । **20 (50)**

**<u>TS 7.2.6.3</u>**

गायत्रं ब्रह्मवर्चसं गायत्रियामेव ब्रह्मवर्चसे प्रति तिष्ठन्ति चतुश्चत्वारि॒ꣳशो भवति चतुश्चत्वारि॒ꣳशदक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुप् त्रिष्टुभ्येवेन्द्रिये प्रति तिष्ठन्त्यष्टाचत्वारि॒ꣳशो भवत्यष्टाचत्वारि॒ꣳशदक्षरा जगती जागताः पशवो जगत्यामेव पशुषु प्रति तिष्ठन्त्ये-कादशरात्रो

भवति पञ्च वा ऋतव आर्तवाः पञ्चर्तुष्वेवाऽऽर्तवेषु सँवथ्सरे

प्रतिष्ठाय प्रजामव रुन्धते ऽतिरात्रावभितो भवतः

प्रजायै परिगृहीत्यै ॥ **21**

**TS 7.2.6.3 - Padam**

गायत्रम् । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । गायत्रियाम् । एव ।

ब्रह्मवर्चस इति ब्रह्म – वर्चसे । प्रतीति । तिष्ठन्ति । चतुश्चत्वारि॒ꣳश

इति चतुः – चत्वारि॒ꣳशः । भवति । चतुश्चत्वारि॒ꣳशदक्षरेति

चतुश्चत्वारि॒ꣳशत् – अक्षरा । त्रिष्टुक् । इन्द्रियम् । त्रिष्टुप् । त्रिष्टुभि ।

एव । इन्द्रिये । प्रतीति । तिष्ठन्ति ।

अष्टाचत्वारि॒ꣳश इत्यष्टा – चत्वारि॒ꣳशः । भवति ।

अष्टाचत्वारि॒ꣳशदक्षरेत्यष्टाचत्वारि॒ꣳशत् – अक्षरा । जगती ।

जागताः । पशवः । जगत्याम् । एव । पशुषु । प्रतीति । तिष्ठन्ति ।

एकादशरात्र इत्येकादश–रात्रः । भवति । पञ्च । वै । ऋतवः ।

आर्तवाः । पञ्च । ऋतुषु । एव । आर्तवेषु ।

सँवथ्सर इति सं – वथ्सरे । प्रतिष्ठायेति प्रति – स्थाय । प्रजामिति प्र – जाम् । अवेति । रुन्धते । अतिरात्रावित्यति – रात्रौ । अभितः । भवतः । प्रजाया इति प्र – जायै । परिगृहीत्या इति परि–गृहीत्यै ॥

**21 (49)** *(तस्माद् – गायत्र्ये – कान्नपञ्चाशच्च) (A6)*

**TS 7.2.7.1**

ऐन्द्रवायवाग्रान् गृह्णीयाद्–यः कामयेत यथापूर्वं प्रजाः कल्पेरन्निति यज्ञस्य वै क्लृप्तिमनु प्रजाः कल्पन्ते यज्ञस्या–क्लृप्तिमनु न कल्पन्ते यथापूर्वमेव प्रजाः कल्पयति न ज्यायाꣳसं कनीयानति क्रामत्यैन्द्रवायवाग्रान् गृह्णीयादामयाविनः प्राणेन वा एष व्यृद्ध्यते यस्याऽऽ*मयति प्राण ऐन्द्रवायवः प्राणेनैवैनꣳ समर्द्धयति मैत्रावरुणाग्रान् गृह्णीरन् येषां दीक्षितानां प्रमीयेत–[ ] **22**

**TS 7.2.7.1 - Padam**

ऐन्द्रवायवाग्रानित्यैन्द्रवायव – अग्रान् । गृह्णीयात् । यः । कामयेत । यथापूर्वमिति यथा – पूर्वम् । प्रजा इति प्र – जाः । कल्पेरन्न् । इति । यज्ञस्य । वै । क्लृप्तिम् । अन्विति । प्रजा इति प्र – जाः ।

कल्पन्ते । यज्ञस्य । अक्लृप्तिम् । अन्विति । न । कल्पन्ते ।
यथापूर्वमिति यथा – पूर्वम् । एव । प्रजा इति प्र – जाः ।
कल्पयति । न । ज्यायाꣳसम् । कनीयान् । अतीति । क्रामति ।
ऐन्द्रवायवाग्रानित्यैन्द्रवायव – अग्रान् । गृह्णीयात् । आमयाविनः ।
प्राणेनेति प्र – अनेन । वै । एषः । वीति । ऋद्ध्यते । यस्य ।
आमयति । प्राण इति प्र – अनः । ऐन्द्रवायव इत्यैन्द्र – वायवः ।
प्राणेनेति प्र – अनेन । एव । एनम् । समिति । अर्द्धयति ।
मैत्रावरुणाग्रानिति मैत्रावरुण – अग्रान् । गृह्णीरन्न् । येषाम् ।
दीक्षितानाम् । प्रमीयेतेति प्र – मीयेत । **22 (50)**

**<u>TS 7.2.7.2</u>**

प्राणापानाभ्यां ँवा एते व्यृद्ध्यन्ते येषां दीक्षितानां प्रमीयते प्राणापानौ
मित्रावरुणौ प्राणापानावेव मुखतः परि हरन्त आश्विनाग्रान् गृह्णीता
ऽऽनुजावरोऽश्विनौ वै देवानामानुजावरौ पश्चेवाग्रं पर्यैता–मश्विनावेतस्य
देवता य आनुजावर–स्तावेवैनमग्रं परि णयतः शुक्राग्रान् गृह्णीत गतश्रीः
प्रतिष्ठाकामोऽसौ वा आदित्यः शुक्र एषो ऽन्तो ऽन्तं मनुष्यः – [ ] **23**

**TS 7.2.7.2 - Padam**

प्राणापानाभ्यामिति प्राण – अपानाभ्याम् । वै । एते । वीति ।
ऋद्ध्यन्ते । येषाम् । दीक्षितानाम् । प्रमीयत इति प्र – मीयते ।
प्राणापानाविति प्राण – अपानौ । मित्रावरुणाविति मित्रा – वरुणौ ।
प्राणापानाविति प्राण – अपानौ । एव । मुखतः । परीति । हरन्ते ।
आश्विनाग्रानित्याश्विन–अग्रान् । गृह्णीत । आनुजावर इत्यानु–जावरः ।
अश्विनौ । वै । देवानाम् । आनुजावरावित्यानु – जावरौ । पश्चा ।
इव । अग्रम् । परीति । ऐताम् । अश्विनौ । एतस्य । देवता । यः ।
आनुजावर इत्यानु – जावरः । तौ । एव । एनम् । अग्रम् । परीति ।
नयतः । शुक्राग्रानिति शुक्र – अग्रान् । गृह्णीत । गतश्रीरिति
गत – श्रीः । प्रतिष्ठाकाम इति प्रतिष्ठा – कामः । असौ । वै ।
आदित्यः । शुक्रः । एषः । अन्तः । अन्तम् । मनुष्यः । **23 (50)**

**TS 7.2.7.3**

श्रियै गत्वा नि वर्तते ऽन्तादेवाऽन्तमा रभते न ततः पापीयान्
भवति मन्थ्यग्रान् गृह्णीता–भिचर–न्नार्तपात्रं ँवा एतद्–यन्–मन्थिपात्रं

मृत्युनैवैनं ग्राहयति ताजगार्तिमार्च्छत्या–ग्रयणाग्रान् गृह्णीत यस्य पिता पितामहः पुण्यः स्यादथ तन्न प्राप्नुयाद्–वाचा वा एष इन्द्रियेण व्यृद्ध्यते यस्य पिता पितामहः पुण्यो – [ ] **24**

**TS 7.2.7.3 - Padam**

श्रियै । गत्वा । नीति । वर्तते । अन्तात् । एव । अन्तम् । एति । रभते । न । ततः । पापीयान् । भवति । मन्थ्यग्रानिति मन्थि–अग्रान् । गृह्णीत । अभिचरन्नित्यभि – चरन्न् । आर्तपात्रमित्यार्त – पात्रम् । वै । एतत् । यत् । मन्थिपात्रमिति मन्थि – पात्रम् । मृत्युना । एव । एनम् । ग्राहयति । ताजक् । आर्तिम् । एति । ऋच्छति । आग्रयणाग्रानित्याग्रयण–अग्रान् । गृह्णीत । यस्य । पिता । पितामहः । पुण्यः । स्यात् । अथ । तत् । न । प्राप्नुयादिति प्र – आप्नुयात् । वाचा । वै । एषः । इन्द्रियेण । वीति । ऋद्ध्यते । यस्य । पिता । पितामहः । पुण्यः । **24 (50)**

**TS 7.2.7.4**

भवत्यथ तन्न प्राप्नोत्युर इवैतद्–यज्ञस्य वागिव यदाग्रयणो

वाचैवैनमिन्द्रियेण समर्द्धयति न ततः पापीयान् भवत्युक्थ्याग्रान्

गृह्णीताभिचर्यमाणः सर्वेषां ँवा एतत् पात्राणामिन्द्रियं ँयदुक्थ्यपात्र९ं

सर्वेणैवैनमिन्द्रियेणाति प्र युङ्क्ते सरस्वत्यभि नो नेषि वस्य इति

पुरोरुचं कुर्याद्–वाग्वै – [ ] **25**

**TS 7.2.7.4 - Padam**

भवति । अथ । तत् । न । प्राप्नोतीति प्र – आप्नोति । उरः । इव ।

एतत् । यज्ञस्य । वाक् । इव । यत् । आग्रयणः । वाचा । एव ।

एनम् । इन्द्रियेण । समिति । अर्द्धयति । न । ततः । पापीयान् ।

भवति । उक्थ्याग्रानित्युक्थ्य – अग्रान् । गृह्णीत । अभिचर्यमाण

इत्यभि – चर्यमाणः । सर्वेषाम् । वै । एतत् । पात्राणाम् । इन्द्रियम् ।

यत् । उक्थ्यपात्रमित्युक्थ्य – पात्रम् । सर्वेण । एव । एनम् ।

इन्द्रियेण । अति । प्रेति । युङ्क्ते । सरस्वति । अभीति । नः । नेषि ।

वस्यः । इति । पुरोरुचमिति पुरः – रुचम् । कुर्यात् । वाक् ।

वै । **25 (50)**

**TS 7.2.7.5**

सरस्वती वाचैवैनमति प्र युङ्क्ते मा त्वत् क्षेत्राण्यरणानि गन्मेत्याह

मृत्योर्वै क्षेत्राण्यरणानि तेनैव मृत्योः क्षेत्राणि न गच्छति पूर्णान्

ग्रहान् गृह्णीयादामयाविनः प्राणान्. वा एतस्य शुगृच्छति

यस्याऽऽमयति प्राणा ग्रहाः प्राणानेवास्य शुचो मुञ्चत्युत

यदीतासुर्भवति जीवत्येव पूर्णान् ग्रहान् ( ) गृह्णीयाद्–यर्.हि पर्जन्यो

न वर्.षेत् प्राणान् वा एतर्.हि प्रजानां शुगृच्छति यर्.हि पर्जन्यो न

वर्.षति प्राणा ग्रहाः प्राणानेव प्रजानां शुचो मुञ्चति ताजक्

प्र वर्.षति ॥ **26**

**TS 7.2.7.5 - Padam**

सरस्वती । वाचा । एव । एनम् । अति । प्रेति । युङ्क्ते । मा । त्वत् ।

क्षेत्राणि । अरणानि । गन्म । इति । आह । मृत्योः । वै । क्षेत्राणि ।

अरणानि । तेन । एव । मृत्योः । क्षेत्राणि । न । गच्छति । पूर्णान् ।

ग्रहान् । गृह्णीयात् । आमयाविनः । प्राणानिति प्र - अनान् । वै ।
एतस्य । शुक् । ऋच्छति । यस्य । आमयति । प्राणा इति
प्र - अनाः । ग्रहाः । प्राणानिति प्र-अनान् । एव । अस्य । शुचः ।
मुञ्चति । उत । यदि । इतासुरितीत - असुः । भवति । जीवति ।
एव । पूर्णान् । ग्रहान् ( ) । गृह्णीयात् । यर्.हि । पर्जन्यः । न ।
वर्.षेत् । प्राणानिति प्र - अनान् । वै । एतर्.हि । प्रजानामिति
प्र - जानाम् । शुक् । ऋच्छति । यर्.हि । पर्जन्यः । न । वर्.षति ।
प्राणा इति प्र - अनाः । ग्रहाः । प्राणानिति प्र - अनान् । एव ।
प्रजानामिति प्र - जानाम् । शुचः । मुञ्चति । ताजक् । प्रेति ।
वर्.षति ॥ **26 (75)** *(प्रमीयेत - मनुष्य - ऋद्ध्यते यस्य पिता पितामहः पुण्यो-वाग्वा-एव पूर्णान् ग्रहान्-पञ्चविꣳशतिश्च) (A7)*

**<u>TS 7.2.8.1</u>**

गायत्रो वा ऐन्द्रवायवो गायत्रं प्रायणीय-महस्तस्मात् प्रायणीये-ऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति त्रैष्टुभो वै शुक्रस्त्रैष्टुभं द्वितीय-महस्तस्माद् द्वितीयेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णाति

जागतो वा आग्रयणो जागतं तृतीय–मह्स्तस्मात् तृतीयेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्येतद्वै – [ ] 27

**TS 7.2.8.1 - Padam**

गायत्रः । वै । ऐन्द्रवायव इत्यैन्द्र – वायवः । गायत्रम् । प्रायणीयमिति प्र – अयनीयम् । अहः । तस्मात् । प्रायणीय इति प्र – अयनीये । अहन्न् । ऐन्द्रवायव इत्यैन्द्र – वायवः । गृह्यते । स्वे । एव । एनम् । आयतन इत्या – यतने । गृह्णाति । त्रैष्टुभः । वै । शुक्रः । त्रैष्टुभम् । द्वितीयम् । अहः । तस्मात् । द्वितीये । अहन्न् । शुक्रः । गृह्यते । स्वे । एव । एनम् । आयतन इत्या – यतने । गृह्णाति । जागतः । वै । आग्रयणः । जागतम् । तृतीयम् । अहः । तस्मात् । तृतीये । अहन्न् । आग्रयणः । गृह्यते । स्वे । एव । एनम् । आयतन इत्या – यतने । गृह्णाति । एतत् । वै । 27 (50)

**TS 7.2.8.2**

यज्ञमापद्–यच्छन्दाँस्याप्नोति यदाग्रयणः श्वो गृह्यते यत्रैव यज्ञमदृशन् तत एवैनं पुनः प्र युङ्क्ते जगन्मुखो वै द्वितीयस्त्रिरात्रो

जागत आग्रयणो यच्चतुर्थे ऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दो ऽनु पर्यावर्तन्ते राथन्तरो वा ऐन्द्रवायवो राथन्तरं पञ्चममहस्तस्मात् पञ्चमेऽह – [ ] **28**

**TS 7.2.8.2 - Padam**

यज्ञम् । आपत् । यत् । छन्दाꣳसि । आप्नोति । यत् । आग्रयणः । श्वः । गृह्यते । यत्र । एव । यज्ञम् । अदृशन्न् । ततः । एव । एनम् । पुनः । प्रेति । युङ्क्ते । जगन्मुख इति जगत् – मुखः । वै । द्वितीयः । त्रिरात्र इति त्रि – रात्रः । जागतः । आग्रयणः । यत् । चतुर्थे । अहन्न् । आग्रयणः । गृह्यते । स्वे । एव । एनम् । आयतन इत्या – यतने । गृह्णाति । अथो इति । स्वम् । एव । छन्दः । अन्विति । पर्यावर्तन्त इति परि–आवर्तन्ते । राथन्तर इति राथं–तरः । वै । ऐन्द्रवायव इत्यैन्द्र – वायवः । राथन्तरमिति राथं – तरम् । पञ्चमम् । अहः । तस्मात् । पञ्चमे । अहन्न् । **28 (50)**

**TS 7.2.8.3**

–न्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति बार्.हतो वै शुक्रो बार्.हत॰ं षष्ठमहस्तस्माथ् षष्ठे ऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णात्येतद्–वै द्वितीयं ँयज्ञमापद्–यच्छन्दा॰स्याप्नोति यच्छुक्रः श्वो गृह्यते यत्रैव यज्ञमदृशन् तत एवैनं पुनः प्र युङ्क्ते त्रिष्टुङ्मुखो वै तृतीयस्त्रिरात्रस्त्रैष्टुभः – [ ] **29**

**TS 7.2.8.3 - Padam**

ऐन्द्रवायव इत्यैन्द्र – वायवः । गृह्यते । स्वे । एव । एनम् । आयतन इत्या – यतने । गृह्णाति । बार्.हतः । वै । शुक्रः । बार्.हतम् । षष्ठम् । अहः । तस्मात् । षष्ठे । अहन्न् । शुक्रः । गृह्यते । स्वे । एव । एनम् । आयतन इत्या – यतने । गृह्णाति । एतत् । वै । द्वितीयम् । यज्ञम् । आपत् । यत् । छन्दा॰ंसि । आप्नोति । यत् । शुक्रः । श्वः । गृह्यते । यत्र । एव । यज्ञम् । अदृशन्न् । ततः । एव । एनम् । पुनः । प्रेति । युङ्क्ते । त्रिष्टुङ्मुख इति त्रिष्टुक् – मुखः । वै । तृतीयः । त्रिरात्र इति त्रि – रात्रः । त्रैष्टुभः । **29 (50)**

**TS 7.2.8.4**

शुक्रो यथ् सप्तमे ऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णात्यथो

स्वमेव छन्दो ऽनु पर्यावर्तन्ते वाग्वा आग्रयणो वागष्टममह-

स्तस्मादष्टमे ऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णाति

प्राणो वा ऐन्द्रवायवः प्राणो नवम-महस्तस्मान्नवमे ऽहन्नैन्द्रवायवो

गृह्यते स्व एवैनमायतने गृह्णात्येतद् - [ ] **30**

**TS 7.2.8.4 - Padam**

शुक्रः । यत् । सप्तमे । अहन्न् । शुक्रः । गृह्यते । स्वे । एव ।

एनम् । आयतन इत्या - यतने । गृह्णाति । अथो इति । स्वम् ।

एव । छन्दः । अन्विति । पर्यावर्तन्त इति परि - आवर्तन्ते । वाक् ।

वै । आग्रयणः । वाक् । अष्टमम् । अहः । तस्मात् । अष्टमे ।

अहन्न् । आग्रयणः । गृह्यते । स्वे । एव । एनम् । आयतन

इत्या - यतने । गृह्णाति । प्राण इति प्र - अनः । वै । ऐन्द्रवायव

इत्यैन्द्र - वायवः । प्राण इति प्र - अनः । नवमम् । अहः ।

तस्मात् । नवमे । अहन्न् । ऐन्द्रवायव इत्यैन्द्र - वायवः । गृह्यते ।

स्वे । एव । एनम् । आयतन इत्या – यतने । गृह्णाति ।

एतत् । **30 (50)**

**TS 7.2.8.5**

वै तृतीयंँ यज्ञमापद्–यच्छन्दा᳚स्याप्नोति यदैन्द्रवायवः श्वो गृह्यते यत्रैव यज्ञमदृशन् तत एवैनं पुनः प्र युङ्क्ते ऽथो स्वमेव छन्दो ऽनु पर्यावर्तन्ते पथो वा एते ऽद्ध्यपथेन यन्ति ये ऽन्येनैन्द्रवायवात् प्रतिपद्यन्ते ऽन्तः खलु वा एष यज्ञस्य यद्–दशम–महर्दशमे ऽहन्नैन्द्रवायवो गृह्यते यज्ञस्यै–[ ] **31**

**TS 7.2.8.5 - Padam**

वै । तृतीयम् । यज्ञम् । आपत् । यत् । छन्दा᳚ंसि । आप्नोति । यत् । ऐन्द्रवायव इत्यैन्द्र – वायवः । श्वः । गृह्यते । यत्र । एव । यज्ञम् । अदृशन्न् । ततः । एव । एनम् । पुनः । प्रेति । युङ्क्ते । अथो इति । स्वम् । एव । छन्दः । अन्विति । पर्यावर्तन्त इति परि – आवर्तन्ते । पथः । वै । एते । अधीति । अपथेन । यन्ति । ये । अन्येन । ऐन्द्रवायवादित्यैन्द्र – वायवात् । प्रतिपद्यन्त इति प्रति – पद्यन्ते ।

अन्तः । खलु । वै । एषः । यज्ञस्य । यत् । दशमम् । अहः । दशमे ।
अहन्न् । ऐन्द्रवायव इत्यैन्द्र – वायवः । गृह्यते । यज्ञस्य । **31 (50)**

**TS 7.2.8.6**

–वान्तं गत्वा ऽपथात् पन्थामपि यन्त्यथो यथा वहीयसा प्रतिसारं
ँवहन्ति तादृगेव तच्छन्दाꣳस्यन्यो ऽन्यस्य लोकमभ्यद्ध्यायन्
तान्येतेनैव देवा व्यवाहयन्नैन्द्रवायवस्य वा एतदायतनं
ँयच्चतुर्थमहस्तस्मि–न्नाग्रयणो गृह्यते तस्मादाग्रयणस्याऽऽयतने
नवमेऽहन्नैन्द्रवायवो गृह्यते शुक्रस्य वा एतदायतनं ँयत्
पञ्चम – [ ] **32**

**TS 7.2.8.6 - Padam**

एव । अन्तम् । गत्वा । अपथात् । पन्थाम् । अपीति । यन्ति ।
अथो इति । यथा । वहीयसा । प्रतिसारमिति प्रति–सारम् । वहन्ति ।
तादृक् । एव । तत् । छन्दाꣳसि । अन्यः । अन्यस्य । लोकम् ।
अभीति । अद्ध्यायन्न् । तानि । एतेन । एव । देवाः । वीति ।
अवाहयन्न् । ऐन्द्रवायवस्येत्यैन्द्र – वायवस्य । वै । एतत् ।

आयतनमित्या – यतनम् । यत् । चतुर्थम् । अहः । तस्मिन्न् । आग्रयणः । गृह्यते । तस्मात् । आग्रयणस्य । आयतन इत्या–यतने । नवमे । अहन्न् । ऐन्द्रवायव इत्यैन्द्र – वायवः । गृह्यते । शुक्रस्य । वै । एतत् । आयतनमित्या – यतनम् । यत् । पञ्चमम् । **32 (50)**

**<u>TS 7.2.8.7</u>**

–महस्तस्मिन्नैन्द्रवायवो गृह्यते तस्मादैन्द्रवायवस्याऽऽयतने सप्तमे ऽहञ्छुक्रो गृह्यत आग्रयणस्य वा एतदायतनं ँयथ् षष्ठमहस्तस्मिञ्छुक्रो गृह्यते तस्माच्छुक्रस्याऽऽयतने ऽष्टमे ऽहन्नाग्रयणो गृह्यते छन्दा॑ᳪस्येव तद्–वि वाहयति प्र वस्यसो विवाहमाप्नोति य एवं ँवेदाथो देवताभ्य एव यज्ञे सँविदं दधाति तस्मादिद–मन्यो ऽन्यस्मै ( ) ददाति ॥ **33**

**<u>TS 7.2.8.7 - Padam</u>**

अहः । तस्मिन्न् । ऐन्द्रवायव इत्यैन्द्र – वायवः । गृह्यते । तस्मात् । ऐन्द्रवायवस्येत्यैन्द्र – वायवस्य । आयतन इत्या–यतने । सप्तमे ।

अहन्न् । शुक्रः । गृह्यते । आग्रयणस्य । वै । एतत् ।
आयतनमित्या – यतनम् । यत् । षष्ठम् । अहः । तस्मिन्न् । शुक्रः ।
गृह्यते । तस्मात् । शुक्रस्य । आयतन इत्या – यतने । अष्टमे ।
अहन्न् । आग्रयणः । गृह्यते । छन्दाᳫंसि । एव । तत् । वीति ।
वाहयति । प्रेति । वस्यसः । विवाहमिति वि–वाहम् । आप्नोति ।
यः । एवम् । वेद । अथो इति । देवताभ्यः । एव । यज्ञे ।
सँविदमिति सं – विदम् । दधाति । तस्मात् । इदम् । अन्यः ।
अन्यस्मै ( ) । ददाति ॥ **33 (51)** ***(एतद्वै – पञ्चमेऽहन् – त्रैष्टुभ – एतद् – गृह्यते यज्ञस्य – पञ्चम – मन्यस्मा – एकञ्च) (A8)***

*Special Korvai*

गायत्रस्त्रैष्टुभो जागत एतदाग्रयणो जगन्मुखोऽ थो स्वᳫं राथन्तरो
बार्.हत एतद् वै द्वितीयᳫं शुक्र स्त्रिष्टुङ् मुखो ऽथो वाक् प्राण एतत्
तृतीयमैन्द्रवायवो ऽथो पथो वै दशमं ँयज्ञस्य चतुत्थमाग्रयणो
नवम ऐन्द्रवायवः शुक्रस्य पञ्चमैन्द्रवायवः सप्तमे शुक्रः शुक्र
आग्रयणो यथ्षष्ठमष्ठमे ऽहञ्छन्दाᳫंसि ॥

**TS 7.2.9.1**

प्रजापतिरकामयत प्र जायेयेति स एतं द्वादशरात्रमपश्यत् तमा ऽहरत्

तेनायजत ततो वै स प्राजायत यः कामयेत प्र जायेयेति स

द्वादशरात्रेण यजेत प्रैव जायते ब्रह्मवादिनो वदन्त्यग्निष्टोमप्रायणा यज्ञा

अथ कस्मादतिरात्रः पूर्वः प्र युज्यत इति चक्षुषी वा एते यज्ञस्य

यदतिरात्रौ कनीनिके अग्निष्टोमौ य - [ ] **34**

**TS 7.2.9.1 - Padam**

प्रजापतिरिति प्रजा - पतिः । अकामयत । प्रेति । जायेय । इति ।

सः । एतम् । द्वादशरात्रमिति द्वादश - रात्रम् । अपश्यत् । तम् ।

एति । अहरत् । तेन । अयजत । ततः । वै । सः । प्रेति । अजायत ।

यः । कामयेत । प्रेति । जायेय । इति । सः । द्वादशरात्रेणेति

द्वादश - रात्रेण । यजेत । प्रेति । एव । जायते । ब्रह्मवादिन इति

ब्रह्म-वादिनः । वदन्ति । अग्निष्टोमप्रायणा इत्यग्निष्टोम - प्रायणाः ।

यज्ञाः । अथ । कस्मात् । अतिरात्र इत्यति - रात्रः । पूर्वः । प्रेति ।

युज्यते । इति । चक्षुषी इति । वै । एते इति । यज्ञस्य । यत् ।

अतिरात्रावित्यति – रात्रौ । कनीनिके इति ।

अग्निष्टोमावित्यग्नि– स्तोमौ । यत् । **34 (50)**

**TS 7.2.9.2**

–दग्निष्टोमं पूर्वं प्रयुञ्जीरन् बहिर्द्धा कनीनिके

दद्ध्यु स्तस्मादतिरात्रः पूर्वः प्र युज्यते चक्षुषी एव यज्ञे धित्वा

मद्ध्यतः कनीनिके प्रति दधति यो वै गायत्रीं ज्योतिःपक्षां ँवेद

ज्योतिषा भासा सुवर्गं ँलोकमेति यावग्निष्टोमौ तौ पक्षौ

ये ऽन्तरे ऽष्टावुक्थ्याः स आत्मैषा वै गायत्री ज्योतिःपक्षा य

एवं ँवेद ज्योतिषा भासा सुवर्गं ँलोक – [ ] **35**

**TS 7.2.9.2 - Padam**

अग्निष्टोममित्यग्नि–स्तोमम् । पूर्वम् । प्रयुञ्जीरन्निति प्र–युञ्जीरन् ।

बहिर्द्धेति बहिः – धा । कनीनिके इति । दद्ध्युः । तस्मात् ।

अतिरात्र इत्यति – रात्रः । पूर्वः । प्रेति । युज्यते । चक्षुषी इति ।

एव । यज्ञे । धित्वा । मद्ध्यतः । कनीनिके इति । प्रतीति । दधति ।

यः । वै । गायत्रीम् । ज्योतिःपक्षामिति ज्योतिः – पक्षाम् । वेद ।

ज्योतिषा । भासा । सुवर्गमिति सुवः – गम् । लोकम् । एति । यौ ।
अग्निष्टोमावित्यग्नि – स्तोमौ । तौ । पक्षौ । ये । अन्तरे । अष्टौ ।
उक्थ्याः । सः । आत्मा । एषा । वै । गायत्री । ज्योतिःपक्षेति
ज्योतिः – पक्षा । यः । एवम् । वेद । ज्योतिषा । भासा ।
सुवर्गमिति सुवः – गम् । लोकम् । **35 (50)**

**TS 7.2.9.3**

–मेति प्रजापतिर्वा एष द्वादशधा विहितो यद् द्वादशरात्रो यावतिरात्रो
तौ पक्षौ ये ऽन्तरे ऽष्टावुक्थ्याः स आत्मा प्रजापतिर्वावैष सन्थ्सद्ध
वै सत्रेण स्पृणोति प्राणा वै सत् प्राणानेव स्पृणोति सर्वासां वा एते
प्रजानां प्राणैरासते ये सत्रमासते तस्मात् पृच्छन्ति किमेते सत्रिण
इति प्रियः प्रजाना ( ) मुत्थितो भवति य एवं वेद ॥ **36**

**TS 7.2.9.3 - Padam**

एति । प्रजापतिरिति प्रजा – पतिः । वै । एषः । द्वादशधेति
द्वादश – धा । विहित इति वि – हितः । यत् । द्वादशरात्र इति
द्वादश – रात्रः । यौ । अतिरात्रावित्यति – रात्रौ । तौ । पक्षौ । ये ।

अन्तरे । अष्टौ । उक्थ्याः । सः । आत्मा । प्रजापतिरिति प्रजा-पतिः । वाव । एषः । सन्न् । सत् । ह । वै । सत्रेण । स्पृणोति । प्राणा इति प्र - अनाः । वै । सत् । प्राणानिति प्र - अनान् । एव । स्पृणोति । सर्वासाम् । वै । एते । प्रजानामिति प्र - जानाम् । प्राणैरिति प्र - अनैः । आसते । ये । सत्रम् । आसते । तस्मात् । पृच्छन्ति । किम् । एते । सत्रिणः । इति । प्रियः । प्रजानामिति प्र-जानाम् ( ) । उत्थित इत्युत् - स्थितः । भवति । यः । एवम् । वेद ॥ **36 (55)**

*(अग्निष्टोमौ यथ् - सुवर्गं लोकं - प्रियः प्रजानां - पञ्च च) (A9)*

**TS 7.2.10.1**

न वा एषो ऽन्यतोवैश्वानरः सुवर्गाय लोकाय प्राभवदूर्द्ध्वो ह वा एष आतत आसीत् ते देवा एतं वैँश्वानरं पर्यौहन्थ् सुवर्गस्य लोकस्य प्रभूत्या ऋतवो वा एतेन प्रजापतिमयाजयन् तेष्वार्द्ध्नोदधि तदृद्ध्नोति ह वा ऋत्विक्षु य एवं विँद्वान् द्वादशाहेन यजते ते ऽस्मिन्नैच्छन्त स रसमह वसन्ताय प्रायच्छद् - [ ] **37**

**TS 7.2.10.1 - Padam**

न । वै । एषः । अन्यतोवैश्वानर इत्यन्यतः – वैश्वानरः । सुवर्गायेति
सुवः – गाय । लोकाय । प्रेति । अभवत् । ऊर्द्ध्वः । ह । वै ।
एषः । आतत इत्या – ततः । आसीत् । ते । देवाः । एतम् ।
वैश्वानरम् । परीति । औहन्न् । सुवर्गस्येति सुवः – गस्य ।
लोकस्य । प्रभूत्या इति प्र–भूत्यै । ऋतवः । वै । एतेन ।
प्रजापतिमिति प्रजा–पतिम् । अयाजयन्न् । तेषु । आर्द्ध्नोत् ।
अधीति । तत् । ऋद्ध्नोति । ह । वै । ऋत्विक्षु । यः । एवम् ।
विद्वान् । द्वादशाहेनेति द्वादश – अहेन । यजते । ते । अस्मिन्न् ।
ऐच्छन्त । सः । रसम् । अह । वसन्ताय । प्रेति ।
अयच्छत् । **37 (50)**

**TS 7.2.10.2**

यवं ग्रीष्मायौषधीर्वर्.षाभ्यो व्रीहीञ्छरदे माषतिलौ हेमन्तशिशिराभ्यां
तेनेन्द्रं प्रजापतिरयाजयत् ततो वा इन्द्र इन्द्रोऽभवत्
तस्मादाहुरानुजावरस्य यज्ञ इति स ह्येतेनाऽग्रे ऽयजतैष ह वै

कुणपमत्ति यः सत्रे प्रतिगृह्णाति पुरुषकुणपमश्वकुणपं गौर्वा अन्नं यैन पात्रेणान्नं बिभ्रति यत् तन्न निर्णेनिजति ततो ऽधि – [ ] **38**

**TS 7.2.10.2 - Padam**

यवम् । ग्रीष्माय । ओषधीः । वर्.षाभ्यः । व्रीहीन् । शरदे । माषतिलाविति माष – तिलौ । हेमन्तशिशिराभ्यामिति हेमन्त – शिशिराभ्याम् । तेन । इन्द्रम् । प्रजापतिरिति प्रजा–पतिः । अयाजयत् । ततः । वै । इन्द्रः । इन्द्रः । अभवत् । तस्मात् । आहुः । आनुजावरस्येत्यानु – जावरस्य । यज्ञः । इति । सः । हि । एतेन । अग्रे । अयजत । एषः । ह । वै । कुणपम् । अत्ति । यः । सत्रे । प्रतिगृह्णातीति प्रति – गृह्णाति । पुरुषकुणपमिति पुरुष – कुणपम् । अश्वकुणपमित्यश्व – कुणपम् । गौः । वै । अन्नम् । येन । पात्रेण । अन्नम् । बिभ्रति । यत् । तत् । न । निर्णेनिजतीति निः – नेनिजति । ततः । अधीति । **38 (50)**

**TS 7.2.10.3**

मलं जायत एक एव यजेतैको हि प्रजापतिरार्द्ध्नोद् द्वादश

रात्रीर्दीक्षितः स्याद् द्वादश मासाः सँवथ्सरः सँवथ्सरः प्रजापतिः

प्रजापतिर्वावैष एष ह त्वै जायते यस्तपसो ऽधि जायते चतुर्द्धा वा

एतास्तिस्रस्तिस्रो रात्रयो यद् द्वादशोपसदो याः प्रथमा यज्ञं ताभिः

सं भरति या द्वितीया यज्ञं ताभिरा रभते – [ ] **39**

**TS 7.2.10.3 - Padam**

मलम् । जायते । एकः । एव । यजेत । एकः । हि । प्रजापतिरिति

प्रजा – पतिः । आर्द्ध्नोत् । द्वादश । रात्रीः । दीक्षितः । स्यात् ।

द्वादश । मासाः । सँवथ्सर इति सं – वथ्सरः । सँवथ्सर इति

सं – वथ्सरः । प्रजापतिरिति प्रजा – पतिः ।

प्रजापतिरिति प्रजा – पतिः । वाव । एषः । एषः । ह । तु । वै ।

जायते । यः । तपसः । अधीति । जायते । चतुर्द्धेति चतुः – धा ।

वै । एताः । तिस्रस्तिस्र इति तिस्रः–तिस्रः । रात्रयः । यत् । द्वादश ।

उपसद इत्युप – सदः । याः । प्रथमाः । यज्ञम् । ताभिः । समिति ।
भरति । याः । द्वितीयाः । यज्ञम् । ताभिः । एति । रभते । **39 (50)**

**TS 7.2.10.4**

या स्तृतीयाः पात्राणि ताभिर्निर्णेनिक्ते याश्चतुर्थीरपि ताभिरात्मानमन्तरतः
शुन्धते यो वा अस्य पशुमत्ति मा॒ꣳस॒ꣳ सो ऽत्ति यः पुरोडाशं
मस्तिष्क॒ꣳ स यः परिवापं पुरीष॒ꣳ स य आज्यं मज्जान॒ꣳ स यः
सोम॒ꣳ स्वेद॒ꣳ सो ऽपि ह वा अस्य शीर्.षण्या निष्पदः प्रति गृह्णाति
यो द्वादशाहे प्रतिगृह्णाति तस्माद् द्वादशाहेन ( ) न याज्यं पाप्मनो
व्यावृत्त्यै ॥ **40**

**TS 7.2.10.4 - Padam**

याः । तृतीयाः । पात्राणि । ताभिः । निरिति । नेनिक्ते । याः ।
चतुर्थीः । अपीति । ताभिः । आत्मानम् । अन्तरतः । शुन्धते । यः ।
वै । अस्य । पशुम् । अत्ति । मा॒ꣳसम् । सः । अत्ति । यः ।
पुरोडाशम् । मस्तिष्कम् । सः । यः । परिवापमिति परि – वापम् ।
पुरीषम् । सः । यः । आज्यम् । मज्जानम् । सः । यः । सोमम् ।

स्वेदम् । सः । अपीति । ह । वै । अस्य । शीर्.षण्याः । निष्पद इति

निः – पदः । प्रतीति । गृह्णाति । यः । द्वादशाह इति द्वादश–अहे ।

प्रतिगृह्णातीति प्रति – गृह्णाति । तस्मात् ।

द्वादशाहेनेति द्वादश – अहेन ( ) । न । याज्यम् । पाप्मनः ।

व्यावृत्त्या इति वि – आवृत्त्यै ॥ **40 (54)**

***(अयच्छ – दधि – रभते – द्वादशाहेन – चत्वारि च)*** *(A10)*

**TS 7.2.11.1**

एकस्मै स्वाहा द्वाभ्या॰ स्वाहा त्रिभ्यः स्वाहा चतुर्भ्यः स्वाहा

पञ्चभ्यः स्वाहा षड्भ्यः स्वाहा सप्तभ्यः स्वाहा ऽष्टाभ्यः स्वाहा

नवभ्यः स्वाहा दशभ्यः स्वाहैकादशभ्यः स्वाहा द्वादशभ्यः स्वाहा

त्रयोदशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा

षोडशभ्यः स्वाहा सप्तदशभ्यः स्वाहा ऽष्टादशभ्यः स्वाहैकान्न

वि॰शत्यै स्वाहा नववि॰शत्यै स्वाहैकान्न चत्वारि॰शते स्वाहा

नवचत्वारि॰शते स्वाहैकान्न ( ) षष्ट्यै स्वाहा नवषष्ट्यै

स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा

शताय स्वाहा द्वाभ्याꣳ शताभ्याꣳ स्वाहा सर्वस्मै स्वाहा ॥ **41**

**<u>TS 7.2.11.1 - Padam</u>**

एकस्मै । स्वाहा । द्वाभ्याम् । स्वाहा । त्रिभ्य इति त्रि – भ्यः ।

स्वाहा । चतुर्भ्य इति चतुः – भ्यः । स्वाहा ।

पञ्चभ्य इति पञ्च – भ्यः । स्वाहा । षड्भ्य इति षट्– भ्यः ।

स्वाहा । सप्तभ्य इति सप्त – भ्यः । स्वाहा । अष्टाभ्यः । स्वाहा ।

नवभ्य इति नव – भ्यः । स्वाहा । दशभ्य इति दश – भ्यः ।

स्वाहा । एकादशभ्य इत्येकादश – भ्यः । स्वाहा । द्वादशभ्य इति

द्वादश – भ्यः । स्वाहा । त्रयोदशभ्य इति त्रयोदश–भ्यः । स्वाहा ।

चतुर्दशभ्य इति चतुर्दश – भ्यः । स्वाहा ।

पञ्चदशभ्य इति पञ्चदश – भ्यः । स्वाहा । षोडशभ्य

इति षोडश – भ्यः । स्वाहा । सप्तदशभ्य इति सप्तदश – भ्यः ।

स्वाहा । अष्टादशभ्य इत्यष्टादश – भ्यः । स्वाहा । एकात् । न ।

विꣳशत्यै । स्वाहा । नवविꣳशत्या इति नव – विꣳशत्यै । स्वाहा ।

एकात् । न । चत्वारिꣳशते । स्वाहा । नवचत्वारिꣳशत इति

नव – चत्वारिꣳशते । स्वाहा । एकात् । न ( ) । षष्ट्यै । स्वाहा ।

नवषष्ट्या इति नव – षष्ट्यै । स्वाहा । एकात् । न । अशीत्यै ।

स्वाहा । नवाशीत्या इति नव – अशीत्यै । स्वाहा । एकात् । न ।

शताय । स्वाहा । शताय । स्वाहा । द्वाभ्याम् । शताभ्याम् । स्वाहा ।

सर्वस्मै । स्वाहा ॥ **41 (71)**

*(नवचत्वारिꣳशते स्वाहै–कान्नैकविꣳशतिश्च) (A11)*

**TS 7.2.12.1**

एकस्मै स्वाहा त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा

नवभ्यः स्वाहैकादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः

स्वाहा सप्तदशभ्यः स्वाहैकान्न विꣳशत्यै स्वाहा नवविꣳशत्यै

स्वाहैकान्न चत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्न षष्ट्यै

स्वाहा नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न

शताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ **42**

**TS 7.2.12.1 - Padam**

एकस्मै । स्वाहा । त्रिभ्य इति त्रि – भ्यः । स्वाहा । पञ्चभ्य इति पञ्च – भ्यः । स्वाहा । सप्तभ्य इति सप्त – भ्यः । स्वाहा । नवभ्य इति नव – भ्यः । स्वाहा । एकादशभ्य इत्येकादश–भ्यः । स्वाहा । त्रयोदशभ्य इति त्रयोदश – भ्यः । स्वाहा । पञ्चदशभ्य इति पञ्चदश – भ्यः । स्वाहा । सप्तदशभ्य इति सप्तदश – भ्यः । स्वाहा । एकात् । न । विꣳशत्यै । स्वाहा । नवविꣳशत्या इति नव – विꣳशत्यै । स्वाहा । एकात् । न । चत्वारिꣳशते । स्वाहा । नवचत्वारिꣳशत इति नव–चत्वारिꣳशते । स्वाहा । एकात् । न । षष्ट्यै । स्वाहा । नवषष्ट्या इति नव–षष्ट्यै । स्वाहा । एकात् । न । अशीत्यै । स्वाहा । नवाशीत्या इति नव – अशीत्यै । स्वाहा । एकात् । न । शताय । स्वाहा । शताय । स्वाहा । सर्वस्मै । स्वाहा ॥ **42 (50)**

*(एकस्मै त्रिभ्यः – पञ्चाशत्) (A12)*

**TS 7.2.13.1**

द्वाभ्या॑ꣳ स्वाहा॑ च॒तु॒र्भ्य॑ः स्वाहा॑ ष॒ड्भ्यः स्वाहा॒ऽष्टा॒भ्यः स्वाहा॑
द॒श॒भ्यः स्वाहा॒ द्वा॒द॒श॒भ्यः स्वाहा॑ चतु॒र्द॒श॒भ्यः स्वाहा॑
षो॒ड॒श॒भ्यः स्वाहा॒ऽष्टा॒द॒श॒भ्यः स्वाहा॑ वि॒ꣳ॒श॒त्यै स्वाहा॒ऽष्टान॑वत्यै॒
स्वाहा॑ श॒ता॒य॒ स्वाहा॒ सर्व॑स्मै॒ स्वाहा॒ ॥ **43**

**TS 7.2.13.1 - Padam**

द्वाभ्या॒म् । स्वाहा॒ । च॒तु॒र्भ्य॒ इति॑ च॒तुः – भ्यः॒ । स्वाहा॒ । ष॒ड्भ्य इति॑
षट् – भ्यः । स्वाहा॒ । अ॒ष्टा॒भ्यः । स्वाहा॒ । द॒श॒भ्य॒ इति॑ द॒श–भ्यः॒ ।
स्वाहा॒ । द्वा॒द॒श॒भ्य॒ इति॑ द्वा॒द॒श – भ्यः॒ । स्वाहा॒ । च॒तु॒र्द॒श॒भ्य॒ इति॑
च॒तु॒र्द॒श – भ्यः॒ । स्वाहा॒ । षो॒ड॒श॒भ्य॒ इति॑ षो॒ड॒श – भ्यः॒ । स्वाहा॒ ।
अ॒ष्टा॒द॒श॒भ्य॒ इत्य॑ष्टा॒द॒श – भ्यः॒ । स्वाहा॒ । वि॒ꣳ॒श॒त्यै । स्वाहा॒ ।
अ॒ष्टान॑वत्या॒ इत्य॒ष्टा॒ – न॒व॒त्यै॒ । स्वाहा॒ । श॒ता॒य॒ । स्वाहा॒ । सर्व॑स्मै ।
स्वाहा॒ ॥ **43 (26)** *(द्वाभ्या॒मष्टान॑वत्यै॒ – षड्विꣳशतिः) (A13)*

**TS 7.2.14.1**

त्रि॒भ्यः स्वाहा॑ प॒ञ्च॒भ्यः स्वाहा॑ स॒प्त॒भ्यः स्वाहा॑ न॒व॒भ्यः
स्वाहै॑काद॒श॒भ्यः स्वाहा॒ त्र॒यो॒द॒श॒भ्यः स्वाहा॑ पञ्चद॒श॒भ्यः स्वाहा॑

सप्तदशभ्यः स्वाहैकान्न विꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्न चत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्न षष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ 44

**TS 7.2.14.1 - Padam**

त्रिभ्य इति त्रि – भ्यः । स्वाहा । पञ्चभ्य इति पञ्च – भ्यः । स्वाहा । सप्तभ्य इति सप्त–भ्यः । स्वाहा । नवभ्य इति नव–भ्यः । स्वाहा । एकादशभ्य इत्येकादश – भ्यः । स्वाहा । त्रयोदशभ्य इति त्रयोदश – भ्यः । स्वाहा । पञ्चदशभ्य इति पञ्चदश – भ्यः । स्वाहा । सप्तदशभ्य इति सप्तदश – भ्यः । स्वाहा । एकात् । न । विꣳशत्यै । स्वाहा । नवविꣳशत्या इति नव – विꣳशत्यै । स्वाहा । एकात् । न । चत्वारिꣳशते । स्वाहा । नवचत्वारिꣳशत इति नव – चत्वारिꣳशते । स्वाहा । एकात् । न । षष्ट्यै । स्वाहा । नवषष्ट्या इति नव – षष्ट्यै । स्वाहा । एकात् । न । अशीत्यै । स्वाहा । नवाशीत्या इति नव – अशीत्यै । स्वाहा । एकात् । न ।

शताय । स्वाहा । शताय । स्वाहा । सर्वस्मै । स्वाहा ॥ **44 (48)**

*(त्रिभ्यो – ऽष्टाचत्वारिꣳशत्) (A14)*

**TS 7.2.15.1**

चतुर्भ्यः स्वाहा ऽष्टाभ्यः स्वाहा द्वादशभ्यः स्वाहा षोडशभ्यः स्वाहा विꣳशत्यै स्वाहा षण्णवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ **45**

**TS 7.2.15.1 - Padam**

चतुर्भ्य इति चतुः – भ्यः । स्वाहा । अष्टाभ्यः । स्वाहा । द्वादशभ्य इति द्वादश – भ्यः । स्वाहा । षोडशभ्य इति षोडश – भ्यः । स्वाहा । विꣳशत्यै । स्वाहा । षण्णवत्या इति षट्–नवत्यै । स्वाहा । शताय । स्वाहा । सर्वस्मै । स्वाहा ॥ **45 (16)**

*(चतुर्भ्यः षण्णवत्यै – षोडश) (A15)*

**TS 7.2.16.1**

पञ्चभ्यः स्वाहा दशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा विꣳशत्यै स्वाहा पञ्चनवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ **46**

**TS 7.2.16.1 - Padam**

पञ्चभ्य इति पञ्च – भ्यः । स्वाहा । दशभ्य इति दश – भ्यः । स्वाहा । पञ्चदशभ्य इति पञ्चदश – भ्यः । स्वाहा । विꣳशत्यै । स्वाहा । पञ्चनवत्या इति पञ्च – नवत्यै । स्वाहा । शताय । स्वाहा । सर्वस्मै । स्वाहा ॥ **46 (14)**

*(पञ्चभ्यः पञ्चनवत्यै – चतुर्दश) (A16)*

**TS 7.2.17.1**

दशभ्यः स्वाहा विꣳशत्यै स्वाहा त्रिꣳशते स्वाहा चत्वारिꣳशते स्वाहा पञ्चाशते स्वाहा षष्ट्यै स्वाहा सप्तत्यै स्वाहा ऽशीत्यै स्वाहा नवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ **47**

**TS 7.2.17.1 - Padam**

दशभ्य इति दश – भ्यः । स्वाहा । विꣳशत्यै । स्वाहा । त्रिꣳशते । स्वाहा । चत्वारिꣳशते । स्वाहा । पञ्चाशते । स्वाहा । षष्ट्यै । स्वाहा । सप्तत्यै । स्वाहा । अशीत्यै । स्वाहा । नवत्यै । स्वाहा । शताय । स्वाहा । सर्वस्मै । स्वाहा ॥ **47 (22)**

*(दशभ्यो – द्वाविꣳशतिः) (A17)*

**TS 7.2.18.1**

विꣳशत्यै स्वाहा चत्वारिꣳशते स्वाहा षष्ट्यै स्वाहाऽशीत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ **48**

**TS 7.2.18.1 - Padam**

विꣳशत्यै । स्वाहा । चत्वारिꣳशते । स्वाहा । षष्ट्यै । स्वाहा । अशीत्यै । स्वाहा । शताय । स्वाहा । सर्वस्मै । स्वाहा ॥ **48 (12)**

*(विꣳशत्यै – द्वादश) (A18)*

**TS 7.2.19.1**

पञ्चाशते स्वाहा शताय स्वाहा द्वाभ्याꣳ शताभ्याꣳ स्वाहा त्रिभ्यः शतेभ्यः स्वाहा चतुर्भ्यः शतेभ्यः स्वाहा पञ्चभ्यः शतेभ्यः स्वाहा षड्भ्यः शतेभ्यः स्वाहा सप्तभ्यः शतेभ्यः स्वाहाऽष्टाभ्यः शतेभ्यः स्वाहा नवभ्यः शतेभ्यः स्वाहा सहस्राय स्वाहा सर्वस्मै स्वाहा ॥ **49**

**TS 7.2.19.1 - Padam**

पञ्चाशते । स्वाहा । शताय । स्वाहा । द्वाभ्याम् । शताभ्याम् । स्वाहा । त्रिभ्य इति त्रि – भ्यः । शतेभ्यः । स्वाहा । चतुर्भ्य इति चतुः – भ्यः । शतेभ्यः । स्वाहा । पञ्चभ्य इति पञ्च–भ्यः ।

शतेभ्यः । स्वाहा । षड्भ्य इति षट्– भ्यः । शतेभ्यः । स्वाहा ।
सप्तभ्य इति सप्त–भ्यः । शतेभ्यः । स्वाहा । अष्टाभ्यः । शतेभ्यः ।
स्वाहा । नवभ्य इति नव – भ्यः । शतेभ्यः । स्वाहा । सहस्राय ।
स्वाहा । सर्वस्मै । स्वाहा ॥ **49 (32)**

*(पञ्चाशते – द्वात्रिꣳशत्) (A19)*

**TS 7.2.20.1**

शताय स्वाहा सहस्राय स्वाहा ऽयुताय स्वाहा नियुताय स्वाहा
प्रयुताय स्वाहा ऽर्बुदाय स्वाहा न्यर्बुदाय स्वाहा समुद्राय स्वाहा
मद्ध्याय स्वाहा ऽन्ताय स्वाहा परार्द्धाय स्वाहोषसे स्वाहा व्युष्ट्यै
स्वाहोदेष्यते स्वाहोद्यते स्वाहोदिताय स्वाहा सुवर्गाय स्वाहा लोकाय
स्वाहा सर्वस्मै स्वाहा ॥ **50**

**TS 7.2.20.1 - Padam**

शताय । स्वाहा । सहस्राय । स्वाहा । अयुताय । स्वाहा । नियुतायेति
नि – युताय । स्वाहा । प्रयुतायेति प्र – युताय । स्वाहा । अर्बुदाय ।
स्वाहा । न्यर्बुदायेति नि – अर्बुदाय । स्वाहा । समुद्राय । स्वाहा ।

मद्ध्याय । स्वाहा । अन्ताय । स्वाहा । परार्द्धायेति पर–अर्द्धाय ।
स्वाहा । उषसे । स्वाहा । व्युष्ट्या इति वि – उष्ट्यै । स्वाहा ।
उदेष्यत इत्युत् – एष्यते । स्वाहा । उद्यत इत्युत् – यते । स्वाहा ।
उदितायेत्युत् – इताय । स्वाहा । सुवर्गायेति सुवः–गाय । स्वाहा ।
लोकाय । स्वाहा । सर्वस्मै । स्वाहा ॥ **50 (38)**

*(शताया–ऽष्टात्रिꣳशत्) (A20)*

===============

**Prasna Korvai with starting Padams of 1 to 20 Anuvaakams :-**

(साद्ध्याः षड् रात्रं – कुसुरुबिन्दः सप्तरात्रं – बृहस्पतिरष्टरात्रं – प्रजापतिस्ताः क्षुधन्नवरात्रं – प्रजापतिरकामयत दशहोतारात्र – मृतव – ऐन्द्रवायवाग्रान् – गायत्रो वै – प्रजापतिः स द्वादशरात्रं – न वा –एकस्मा – एकस्मै – द्वाभ्यां – त्रिभ्यः – चतुर्भ्यः – पञ्चभ्यो – दशभ्यो – विꣳशत्यै – पञ्चाशते – शताय – विꣳशतिः )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(साद्ध्या – अस्मा इमे लोका – गायत्रं – ँवै तृतीय – मेकस्मै – पञ्चाशत् )

**First and Last Padam of Second Prasnam of 7th Kandam**

(साद्ध्याः – सर्वस्मै स्वाहा )

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे

सप्तमकाण्डे द्वितीयः प्रश्नः समाप्तः ॥

## Details of Panchati and Padam for Kandam 7, Prasanam 2 (TS 7.2)

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 4 | 211 |
| Anuvakam 2 | 3 | 142 |
| Anuvakam 3 | 2 | 100 |
| Anuvakam 4 | 3 | 133 |
| Anuvakam 5 | 6 | 281 |
| Anuvakam 6 | 3 | 149 |
| Anuvakam 7 | 5 | 275 |
| Anuvakam 8 | 7 | 351 |
| Anuvakam 9 | 3 | 155 |
| Anuvakam 10 | 4 | 204 |
| Anuvakam 11 | 1 | 71 |
| Anuvakam 12 | 1 | 50 |
| Anuvakam 13 | 1 | 26 |
| Anuvakam 14 | 1 | 48 |
| Anuvakam 15 | 1 | 16 |
| Anuvakam 16 | 1 | 14 |
| Anuvakam 17 | 1 | 22 |
| Anuvakam 18 | 1 | 12 |
| Anuvakam 19 | 1 | 32 |
| Anuvakam 20 | 1 | 38 |
| Total → | 50 | 2330 |

**Notes:**

1. **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**

2. **Please download our vedic compilations from our web site www.vedavms.in**